## गुरु पादुका स्तोत्रम् in Hindi

नंत-संसार समुद्र-तार नौकायिताभ्यां गुरुभक्तिदाभ्याम् ।
वैराग्य साम्राज्यद पूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥**1**॥

कवित्व वाराशिनिशाकराभ्यां दौर्भाग्यदावांबुदमालिकाभ्याम् ।
दूरिकृतानम्र विपत्ततिभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥**2**॥

नता ययोः श्रीपतितां समीयुः कदाचिद-प्याशु दरिद्रवर्याः ।
मूकाश्च वाचस्पतितां हि ताभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥**3**॥

नालीकनीकाश पदाहृताभ्यां नानाविमोहादि-निवारिकाभ्यां ।
नमज्जनाभीष्टततिप्रदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥**4**॥

नृपालि मौलिव्रजरत्नकांति सरिद्विराजत् झषकन्यकाभ्यां ।
नृपत्वदाभ्यां नतलोक पंक्ते: नमो नमः श्रीगुरुपादुकाभ्याम् ॥**5**॥

पापांधकारार्क परंपराभ्यां तापत्रयाहींद्र खगेश्र्वराभ्यां ।
जाड्याब्धि संशोषण वाडवाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥**6**॥

शमादिषट्क प्रदवैभवाभ्यां समाधिदान व्रतदीक्षिताभ्यां ।
रमाधवांध्रिस्थिरभक्तिदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥**7**॥

स्वार्चापराणां अखिलेष्टदाभ्यां स्वाहासहायाक्षधुरंधराभ्यां ।
स्वांताच्छभावप्रदपूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥**8**॥

कामादिसर्प व्रजगारुडाभ्यां विवेकवैराग्य निधिप्रदाभ्यां ।
बोधप्रदाभ्यां दृतमोक्षदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥**9**॥

## Guru Paduka Stotram in English

**Nanta-samsara samudra-tara noukayitabhyaam gurubhaktidabhyaam ।**
**Vairagya samrajyada pujanabhyaam namo namah shrigurupadukabhyaam ॥1॥**

**Kavitva varashinishakarabhyaam daurbhagyadavamudamalikabhyaam |**
**Duurikritanamra vipattatibhyaam namo namah shrigurupadukabhyaam ||2||**

**Nata yayoh shripatitam samiyuh kadachid-apyashu daridravaryah |**
**Mukashcha vachaspatitam hi tabhyaam namo namah shrigurupadukabhyaam ||3||**

**Nalikaanikasha padahritabhyaam nanavimohadi-nivaarikabhyaam |**
**Namajjanabhishtatatipradabhyaam namo namah shrigurupadukabhyaam ||4||**

**Nripali maulivrajaratnakanti saridviraajat jhashakanyakabhyaam |**
**Nripatvadabhyaam nataloka pankteh namo namah shrigurupadukabhyaam ||5||**

**Paapandhakaararka paramparabhyaam taapatrayahindrakhageshwarabhyaam |**
**Jadyabdhisamshoshan vaadavabhyaam namo namah shrigurupadukabhyaam ||6||**

**Shamadishatka pradavaibhavabhyaam samadhidan vratadikshitabhyaam |**
**Ramadhavandhristhirabhaktidabhyaam namo namah shrigurupadukabhyaam ||7||**

**Svaarchaparaanam akhilishtadabhyaam svahasahayaakshadhurandharabhyaam |**
**Svaantachchhabhavapradapujanabhyaam namo namah shrigurupadukabhyaam ||8||**

**Kaamadisarp vrajagarudabhyaam vivekavairagya nidhipradabhyaam |**
**Bodhapradabhyaam dritamokshadabhyaam namo namah shrigurupadukabhyaam ||9||**